महावि॰ का नाम

अ॰ वि॰ सं॰ महावि॰ रहीमपुर, खगड़िया

दिनाङ्क 4.12.2020

उपशास्त्री द्वितीयवर्ष

व्याकरण

भाग-89

विषय - तत्पुरुष समास प्रकरणम्।

इदं चानियतलिङ्गविषयम्। तेन आदिं वचति प्रातरादिरित्यत्र न भवति, आदिशब्दस्य नियतलिङ्गत्वात्। 'ततोऽपुरुषोऽनञ्'। नञ्समासकर्मधारयाभ्यां भिन्नस्तत्पुरुषो वक्ष्यमाणकार्यभागित्यर्थः। तदाह - 'अधिकारोऽयमिति'। 'परवल्लिङ्गम्' - इत्यतः प्रागिति शेषः। संज्ञायां कन्था। सुगममेव। 'उपज्ञा'। उपज्ञायते प्रथमं ज्ञायत इत्युपज्ञा। 'स्त्रियां क्तिन्' इत्यधिकारे 'आतश्चोपसर्गे' इति कर्मण्यङ्। उपक्रम्यते आरभ्यते इत्युपक्रमः। कर्मणि घञ्। 'नोदात्तोपदेशस्य' इति वृद्धिनिषेधः। उपज्ञा चोपक्रमश्चेति समाहारद्वन्द्वः। तत्पुरुष इत्यस्य विशेषणमिदम्, तदन्तविधिः। 'स नपुंसकम्' इत्यतो नपुंसकमित्यनुवर्तते। तदाह - 'उपज्ञान्त उपक्रमान्तश्चेति'। तच्छब्देन उपज्ञोपक्रमौ विवक्षितौ। आदिशब्दो भावप्रधानः प्राथम्ये वर्तते। तयोरादिः प्राथम्यं तदादिः। तस्य आचिख्यासा आख्यातुमिच्छा, विवक्षायामिति यावत्। तदाह - 'तयोरादि रित्यादि'। पाणिनेरुपज्ञेति। कर्तरि षष्ठी। पाणिन्युपज्ञं ग्रन्थ इति। पाणिनिना प्रथमं ज्ञायमान इत्यर्थः। इदं प्रकरणं परवल्लिङ्गत्वस्य विशेष्यनिघ्नत्वस्य चापवादः। नन्दोपक्रमं द्रोणा इति। नन्देनारभ्यमाणा इत्यर्थः। कर्तरि षष्ठ्याः समासः। 'छाया बाहुल्ये'। छायया तत्पुरुषस्य विशेषणात् तदन्तविधिमभिप्रेत्याह —

NOTES

Scanned with CamScanner

'छायान्त इति', पूर्वपदार्थेति। कस्य बाहुल्ये इत्याकाङ्क्षायाम् आपादक द्रव्य निमित्तकत्वात् छायायाः तद्बाहुल्ये इति गम्यते। तच्छायापादक द्रव्यमर्थात् पूर्वपदार्थभूतमिति भावः। बाहुल्ये किम्? कुड्यस्य छाया कुड्यच्छाया।

'सभा'। राजा च अमनुष्यश्च राजामनुष्यौ, तौ पूर्वौ यस्याः सा राजामनुष्यपूर्वा इति विग्रहः। समया तत्पुरुष विशेषणात्तदन्तविधिः। राजशब्देन राजपर्याय एव विवक्षितः, न तु राजन्शब्दः। तदाह — 'राजपर्याय पूर्व इति। इन सभम्, ईश्वरसभमिति। इनस्य ईश्वरस्य वा सभेति विग्रहः। इनेश्वरशब्दौ राजपर्यायाविति भावः। पर्यायमात्र ग्रहणे प्रमाणं दर्शयति — 'पर्यायस्यैवेष्यत इति', भाष्य इतेति शेषः। 'स्वं रूपम्' इति सूत्रे 'जित्पर्यायवचनस्यैव राजाद्यर्थम्' इति वार्तिकं भाष्ये पठितमिति भावः। 'राजसभेति'। राजन्शब्द पूर्वकत्वेऽप्यत्र राज पर्याय पूर्वकत्वं नास्तीति भावः। 'चन्द्रगुप्त सभेति'। चन्द्रगुप्त इति राज विशेषस्य नाम, न तु तत्पर्याय इति भावः। नन्वमनुष्य पूर्वकत्वाद् देवसभेत्यादावपि स्यादित्यत आह — अमनुष्य शब्दो रूढ्येति। असुरशब्दो दैत्यानिवेति भावः।

'अशालां च'। अशालार्थकेत्यर्थः। सभाशब्दः शालायां सङ्घातार्थे च वर्तते। तत्र राजामनुष्य पूर्वकस्य शालावाचिनः सभाशब्दस्य पूर्वसूत्रे क्लीबत्वमुक्तम्। संप्रति संघातवाचिनः सभाशब्दस्य क्लीबत्वमुच्यत इत्याह — संघातार्था या सभेति सभाशब्द इत्यर्थः। 'विभाषा सेना'। प्रथमार्थे षष्ठी। तत्पुरुष इत्यनुवृत्तं सेनादिभिर्विशेष्यते। तदन्तविधिः। तदाह- 'एतदन्त इति'।

दिनेशप्रतापसिंह
(एसोसियेट प्रोफेसर)
व्याकरण

NOTES

Scanned with CamScanner